# ॥ गुह पञ्चकम् ॥

**|| guha pañcakam ||**

ओङ्कारनगरस्थं तं निगमान्तवनेश्वरम् ।

नित्यमेकं शिवं शान्तं वन्दे गुहमुमासुतम् ॥ १ ॥

oṅkāranagarasthaṁ taṁ nigamāntavaneśvaram |

nityamekaṁ śivaṁ śāntaṁ vande guhamumāsutam || 1 ||

वाचामगोचरं स्कन्दं चिदुद्यानविहारिणम् ।

गुरुमूर्तिं महेशानं वन्दे वन्दे गुहमुमासुतम् ॥ २ ॥

vācāmagocaraṁ skandaṁ cidudyānavihāriṇam |

gurumūrtiṁ maheśānaṁ vande vande guhamumāsutam || 2 ||

सच्चिदानन्दरूपेशं संसारध्वान्तदीपकम् ।

सुब्रह्मण्यमनाद्यन्तं वन्दे गुहमुमासुतम् ॥ ३ ॥

saccidānandarūpeśaṁ saṁsāradhvāntadīpakam |

subrahmaṇyamanādyantaṁ vande guhamumāsutam || 3 ||

स्वामिनाथं दयासिन्धुं भवसागरतारकम् ।

निष्कलाङ्गं गुणातीतं वन्दे गुहमुमासुतम् ॥ ४ ॥

svāminātharh dayāsindhurh bhavasāgaratārakam ।

niṣkalāṅgaṁ guṇātītaṁ vande guhamumāsutam ।। 4 ।।

निराकारं निराधारं निर्विकारं निरामयम् ।

निर्द्वन्द्वं च निरालम्बं वन्दे गुहमुमासुतम् ॥ ५ ॥

nirākāraṁ nirādhāraṁ nirvikāraṁ nirāmayam ।

nirdvandvaṁ ca nirālambaṁ vande guhamumāsutam ।। 5 ।।

॥ इति शिवम् ॥

।। iti śivam ।।

www.kamakotimandali.com